# Shivanama Kalpalatalavalah

# શિવનામકલ્પલતાલવાલઃ

## Document Information

Text title : Shivanama Kalpalata Alavalah

File name : shivanAmakalpalatAlavAlaH.itx

Category : aShTottarashatanAmAvalI, shiva, nAmAvalI, shivarahasya

Location : doc_shiva

Author : Traditional

Description-comments : see corresponding stotram/nAmAvalI. shivarahasyam Amsha 7 | adhyAya 13/203-215||

Latest update : September 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2024

*sanskritdocuments.org*

# શિવનામકલ્પલતાલવાલઃ

(૧ શાર્દૂલવિક્રીડિત)
ૐ મોક્ષસ્યૈકનિદાનમબ્જનયનબ્રહ્મેન્દ્રચન્દ્રાદિભિ-
ર્દેવૈઃ પ્રાણપદીકૃતં કલિમલપ્રધ્વંસિ ધર્માઙ્કુરઃ ।
ભારત્યાપિ સુદુર્નિરૂપમહિમ ત્રય્યન્તરે ગોપિતં
વક્તુર્મઙ્ગલદં શિવેતિ વિમલં નામૈવ નસ્તારકમ્ ॥ ૧/૧॥

(૨ સ્રગ્ધરા)
આનન્ત્યૌદાર્યસત્યાદૃતિ(દતિ)મૃતિહૃતિભિઃ સ્વલ્પસેવાતિતોષા-
ત્સંકષ્ટોચ્છિત્ત્યુપેચ્ચાભય(મય)હિતવચનૈરુત્તમત્વાચ્ચ શમ્ભુઃ ।
સેવ્યો વિષ્ણૂપમન્યુદ્રુહિણમુનિસુતશ્રીદમન્થેચ્છુદેવૈ-
ર્દક્ષશ્રીરામવેદૈરશિશુપશુવધૂરાક્ષસૈઃ સાક્ષિભિર્નઃ ॥ ૨/૨॥

(૩ સ્રગ્ધરા)
નાથ ત્વચ્છક્તિતત્ત્વાવ્યયચરિતભગવ્યૂહમૂર્ત્યઙ્ગસાઙ્ગ-
પ્રત્યઙ્ગોપાઙ્ગકૃત્યાગમભજનકલાંશાદિનિષ્કર્ષમૂઢાઃ ।
ત્વન્નામાપિ ત્યજામો યદિ દુરિતહરં સાન્વવાયાઃ કૃતાર્થીઃ
કેનોપાયેન જાયેમહિ કલિહતકે જન્મભાજો વયં હિ (જન્મનિત્યામતત્ર) ॥ ૩/૩॥

(૪ શિખરિણી)
શિવેતિ દ્વૌ વર્ણૌ પરપદપતદ્ધંસગરુતૌ
તટૌ સંસારાબ્ધેઃ સ્વવિષયકબોધાઙ્કુરદલે ।
શ્રુતેરન્તર્ગોપાયિતતરરહસ્યભ્રુવચરૌ (રહસ્યાહૃતિચરૌ)
ઘરટ્ટગ્રાવાણૌ ભવવિટપિબીજૌઘદલને ॥ ૪/૪॥

(૫ શાર્દૂલવિક્રીડિત)
સ્વામિન્કર્મણિ કાયિકે ન જરસા શક્તોઽસ્મિ નો માનસે
ચાઞ્ચલ્યાન્મનસો ન નિર્ધનતયા પૂર્તેષ્ટદાનાદિકે ।
તસ્માદ્વાચિકમેવ કર્મ વિદુષાં સાધ્યં વિદિત્વા ભવન્-

નામ્નામષ્ટશતં નિરુચ્ય જનુષઃ સાફલ્યમીહેતમામ્(તરામ્) ॥ ૫/૫॥

(૬ આર્યા)
શિવનામકલ્પવલ્લ્યાઃ શિવચરિતાનન્દકાનનભવાયાઃ ।
રુચિરં રત્નાવાલં રચયે સત્પદ્યરત્નવરૈઃ ॥ ૬/૬॥

- -
ૐ શિવાય નમઃ । ૧।
(શિખરિણી)
પ્રકૃત્યા નૈર્મલ્યાદમલગુણયોગાદપિ શમા-
જ્જગત્યાધારત્વાદ્ભજદમૃતદાનાચ્ચ ભવતઃ ।
બલાદિચ્છાશક્તેઃ પ્રથિતપુરિ ભદ્રશ્રવ ઇતિ
પ્રતીતસ્ત્વં લિઙ્ગે ત્રિપુરહર ! તસ્માદસિ શિવઃ ॥ ૧/૭॥

ૐ મહેશ્વરાય નમઃ । ૨।
(વંશસ્થા)
તવેશ્વરત્વં ત્રિજગદ્વિલક્ષણં
ત્વમીશ્વરાણાં મહતામપીશ્વરઃ ।
જગત્તિરોધાનકરઃ શ્રુતીરિતઃ
ત્વં પઞ્ચવિંશોઽપિ પરો મહેશ્વરઃ ॥ ૨/૮॥

ૐ શમ્ભવે નમઃ । ૩।
(ઉપગીતિ)
શં ભાવયસિ ચ ભવસે શં ચ ભવસિ ચેતિ વા દેવઃ ।
ત્વં દેવદારુવિપિને લિઙ્ગે પ્રથિતોઽસ્યતઃ શમ્ભુઃ ॥ ૩/૯॥

ૐ પિનાકિને નમઃ । ૪।
(વસન્તતિલકા)
નાકોઽપિ યેન પિહિતો મુનિકણ્વમૂર્ધ-
વલ્મીકવેણુજધનુસ્ત્રિતયાગ્રજન્મા ।
યઃ સપ્તશીર્ષફણિરૂપ ઉદારકર્મી
ચાપસ્તમાવહસિ નાથ તતઃ પિનાકી ॥ ૪/૧૦॥

ૐ શશિશેખરાય નમઃ । ૫।
(દ્રુતવિલમ્બિત)
મતિમયોઽખિલજીવસમષ્ટિર-

પ્યમેથિ દક્ષમખે હિમર્ગુર્વૃથા (હિમગુથા) ।
ઇતિ ધિયા દયયા વિધૃતસ્ત્વયા
શિરસિ તેન ભવાન્ શશિશેખરઃ ॥ ૫/૧૧॥

ॐ વામદેવાય નમઃ । ૬।
(શાલિની)
વામાર્ધેન ક્રીડસિ ત્વં ત્રિલોકી-
વક્રાચારો વલ્ગુમોદોઽસિ તસ્માત્ ।
વિશ્વોત્તીર્ણઃ સ્રષ્ટૃતામપ્યતીતઃ
પ્રેયાનાત્મા કથ્યસે વામદેવઃ ॥ ૬/૧૨॥

ॐ વિરૂપાક્ષાય નમઃ । ૭।
(ગીતિ)
વિષમાણિ વિવિધશક્તીન્યક્ષીણિ વિલક્ષણાનિ વાક્ષાણિ ।
હર ! હેમકૂટશૈલે લિઙ્ગે વ્યક્તોઽસ્યતો વિરૂપાક્ષઃ ॥ ૭/૧૩॥

ॐ કપર્દિને નમઃ । ૮।
(મેઘવિસ્ફૂર્હિતા)
નદીપૂરૈઃ શોધાદથ સુરધુનીશોધનાત્તત્પ્રદાનાત્-
કચગ્રન્થેર્ભેદોઽતિશયિતગુણઃ સ્યાત્કપર્દો વરાટઃ ।
તદાધારઃ પૂરસ્થગનમપિ તત્પાવનં તત્પ્રકાશ-
ક્ષમત્વં મૈરાલીં પ્રથયસિ તનું છાગલાણ્ડે કપર્દીમ્ ॥ ૮/૧૪॥

ॐ નીલલોહિતાય નમઃ । ૯।
(લલિતા)
નેમાઙ્ગનં પ્રકૃતિપૂરુષં રવે-
રન્તશ્ચ રૂપયુગવેદ્રપુસ્તવ ।
વેધોઽલિકામ્બુકણતોઽરુણાસિતા-
જ્જાતઃ શિવ ત્વમિતિ નીલલોહિતઃ ॥ ૯/૧૫॥

ॐ શઙ્કરાય નમઃ । ૧૦।
(પથ્યાવક્ત્ર)
કર એવ સુખં ધત્સે ભક્તાનાં કુરુષે ચ તત્ ।
પીઠે ચન્દ્રપુરાભિખ્યે નામ્ના ખ્યાતોઽસિ શઙ્કરઃ ॥ ૧૦/૧૬॥

ॐ શૂલપાણયે નમઃ । ૧૧।

(ઔપચ્છન્દસિક)
શિવ તૃપ્તપુરસ્ય(સ્થ) લિઙ્ગમધ્યે
પ્રકટસ્સંસ્ત્રિગુણાત્મકાલલોકૈઃ ।
શુચિશક્તિદશાદિભિસ્ત્રિશૂલં
વિદધત્ત્વં પ્રથિતોઽસિ શૂલપાણિઃ ॥ ૧૧/૧૭॥

ૐ ખટ્વાઙ્ગિને નમઃ । ૧૨।
(શમ્ભુ)
દ્રુહિણસ્યૈકં વદનં મિથ્યાવચનં દૃષ્ટ્વા સદ્યશ્છિન્નમ્ ।
ન તતો વેધોમરણં શમ્ભોઃ ક્વ પુનર્હિંસાજન્યં પાપમ્ ॥

અથ દણ્ડાર્થં(ર્ધં) વહસિ ત્વં તજ્જનશિક્ષાર્થં ખટ્વાયા વા ।
ચરણં યત્તદ્વિમલં સત્ત્વં પ્રથિતસ્તેન ત્વં ખટ્વાઙ્ગી ॥ ૧૨/૧૮॥

ૐ વિષ્ણુવલ્લભાય નમઃ । ૧૩।
(વૈતાલીય)
વિતરન્ હરયે તપસ્યતે પદરેખાજનિતં સુદર્શનમ્ ।
વપુરર્ધમપિ પ્રિયાય તે પ્રથિતસ્ત્વં ભુવિ વિષ્ણુવલ્લભઃ ॥ ૧૩/૧૯॥

ૐ શિપિવિષ્ટાય નમઃ । ૧૪।
(તોટક)
પશવઃ પરમાત્મનિ ધીવિરહાત્
દ્વિપદોઽપિ નરાશ્ચ સુરાઃ શિપયઃ ।
તદનુગ્રહકૃદ્ધૃદયં પ્રવિશન્
પ્રથિતોઽસિ વિભો શિપિવિષ્ટ ઇતિ ॥ ૧૪/૨૦॥

ૐ અમ્બિકાનાથાય નમઃ । ૧૫।
(આર્યા)
નાથસિ હિમાચલમુમાં મનસા તાં નાથસેઽથ તન્નાથઃ ।
(નાથસિ હિમાચલમુમાં મનસા તાં નાથસે તન્નાથઃ) ।
પ્રકટોઽસિ દેવિકાયાં લિઙ્ગે તેનામ્બિકાનાથઃ ॥ ૧૫/૨૧॥

ૐ શ્રીકણ્ઠાય નમઃ । ૧૬।
(વિદ્યુન્માલા)
ક્ષ્વેલં ગઙ્ગામિન્દોર્લેખામાદ્યોત્થાં વા કાન્તિં કણ્ઠે ।
બિભ્રન્માણ્ડલ્યે(વ્યે)શે લિઙ્ગે વિખ્યાતોઽસિ ત્વં શ્રીકણ્ઠઃ ॥ ૧૬/૨૨॥

ॐ ભક્તવત્સલાય નમઃ । ૧૭।

(ઇન્દ્રવંશા)

દાસાનુરસ્યાવપસીતિ તર્ણકાન્

ભક્તાત્મકાનોદનબાલકોભયમ્ ।

પોષાય ગૃહ્ણાસ્યથ તેષુ સૌહૃદં

પુષ્ણાસિ તસ્માદસિ ભક્તવત્સલઃ ॥ ૧૭/૨૩॥

ॐ ભવાય નમઃ । ૧૮।

(ઉદ્ગીતિ)

સત્તામાત્રમધિષ્ઠાનમુપાદાનમસિ વિશ્વસ્ય ।

સલિલસ્યાધિષ્ઠાત્રી મૂર્તિસ્તવ તેન વિશ્રુતોઽસિ ભવઃ ॥ ૧૮/૨૪॥

ॐ શર્વાય નમઃ । ૧૯।

(ઉપેન્દ્રવજ્રા)

યદેતદાભાતિ બહુપ્રકારં

જગત્તદન્તે સકલં શ◌ૃણાસિ ।

અધિષ્ઠિતો મધ્યમદેશલિઙ્ગે

ધરણ્યધિષ્ઠાતૃતયાપિ શર્વઃ ॥ ૧૯/૨૫॥

ॐ ત્રિલોકીશાય નમઃ । ૨૦।

(આર્યાગીતિ)

ઊર્ધ્વાધોમધ્યભુવામ્

અમરાસુરમાનવપ્રકરનિબિડાનામ્ ।

અન્તર્યમનાત્ ત્રિપુટી-

સાક્ષિતયા શઙ્કર ત્રિલોકીશસ્ત્વમ્ ॥ ૨૦/૨૬॥

ॐ શિતિકણ્ઠાય નમઃ । ૨૧।

(અર્ધાઙ્ગી)

દધદધિગલમિન્દ્રપવિપ્રહૃતિપ્રભવં કાલમ્ ।

કાલઞ્જરૈગિરિશિ(શે)ખરે પ્રથિતસ્ત્વં શિતિકણ્ઠઃ ॥ ૨૧/૨૭॥

ॐ શિવાપ્રિયાય નમઃ । ૨૨।

(પ્રમાણિકા)

વતિ(મતિ)ર્ધૃતિઃ કૃતિર્બલં શરીરમિન્દ્રિયં મનઃ ।

સમસ્તમેવ તે શિવા ભવાનતઃ શિવાપ્રિયઃ ॥ ૨૨/૨૮॥

ૐ ઉગ્રાય નમઃ । ૨૩।

(મત્તા)

ઉચ્ચસ્યન્તર્નિખિલજનાનામુદ્વચ્છસ્યપ્યથ જગદૂર્ધ્વમ્ ।

પ્રવ્યક્તઃ સન્ કનખલલિઙ્ગે વાયોરન્તર્વસસિ તદુગ્રઃ ॥ ૨૩/૨૯॥

ૐ કપાલિને નમઃ । ૨૪।

(માલિની)

કમલભવકરોટિવ્રાતમાલાધરત્વાત્

તદધિકબલશાલી ભાસિ કઙ્કાલનાથઃ ।

પરશિવ (પરમશિવ) કરવીરક્ષેત્રમધ્યસ્થ(સ્ય)લિઙ્ગે

નિવસસિ સુરવન્દ્યો નામતસ્ત્વં કપાલી ॥ ૨૪/૩૦॥

ૐ કામારયે નમઃ । ૨૫।

(કર્પૂર)

કર્પૂરશ્વેત ત્વં કામેચ્છોર્દૂરે નિષ્કામાના(ણા)માસન્નઃ ।

દર્પં કન્દર્પસ્ય પ્રક્ષિણ્વન્ વિખ્યાતોઽભૂર્લોકે કામારિઃ ॥ ૨૫/૩૧॥

ૐ અન્ધકાસુરસૂદનાય નમઃ । ૨૬।

(વિબુધપ્રિયા)

લીલયા જગદમ્બયા પિહિતેષુ તે નયનેષ્વભૂ-

દન્ધકારત એવ યઃ સ તુ ભૈરવેણ નિષૂદિતઃ ।

તાદૃશઃ કૃપયા ત્વયા શિવ ગાણપત્યમવાપિતઃ

પ્રેમવાનપિ નામતઃ પુનરન્ધકાસુરસૂદનઃ ॥ ૨૬/૩૨॥

ૐ ગઙ્ગાધરાય નમઃ । ૨૭।

(માલાધર)

અમરતટિની નિજં બલમવેક્ષ્ય ગવાદ્ભવ-

ચ્છિરસિ ગગનાદપી(વા)પતદતીવ વેગોદ્ધુરા ।

પટુતરજટાટવીમુપગતા ન દૃષ્ટા ક્વચિત્

પરમશિવ તાં દધન્નિગદિતોઽસિ ગઙ્ગાધરઃ ॥ ૨૭/૩૩॥

ૐ લલાટાક્ષાય નમઃ । ૨૮।

(ભુજગશિશુભૃતા)

ઉડુશશિરવિસંહર્તા પ્રલયસમયસમાર્ચિઃ ।

તમુપરિ નયને વિભ્રદ્ભવ ભવસિ લલાટાક્ષઃ ॥ ૨૮/૩૪॥

ૐ કાલકાલાય નમઃ । ૨૯।

(ગુણાઙ્ગી)

માર્કણ્ડેયઃ કાલમુખાદ્વિમુક્તો

દગ્ધો રુદ્રઃ કાલ ઇતિ પ્રસિદ્ધઃ ।

તુર્યાં મૂર્તિં બિભ્રદુમાદિ(ધિ)નાથ

પ્રખ્યાતોઽસિ ત્વં ભુવિ કાલકાલઃ ॥ ૨૯/૩૫॥

ૐ કૃપાનિધયે નમઃ । ૩૦।

(શુદ્ધવિરાજ્)

દૈતેયેષુ જલન્ધરાદિષુ

સ્વીયાનામપકારકેષ્વપિ ।

સાલોક્યાદિપદાનિ દિત્સસિ

ત્વં ખ્યાતોઽસિ તતઃ કૃપાનિધિઃ ॥ ૩૦/૩૬॥

ૐ ભીમાય નમઃ । ૩૧।

(શોભા)

ભિયા વાતો વાતિ જ્વલનદિનકરૌ શક્રમૃત્યુપ્રચેતો-

(જ્વલદિનકરૌ, જ્વલતિદિનકરઃ)

મુખા દેવાસ્ત્વત્તો ભયચકિતહૃદસ્તત્પરાઃ સ્વસ્વકાર્યે ।

નભોઽધિષ્ઠાત્રી તે તનુર(રિ)તિવિપુલા સપ્તગોદાવરે ચ

પ્રતીતસ્ત્વં લિઙ્ગે ગિરિવરતનયાનાથ તેનાસિ ભીમઃ ॥ ૩૧/૩૭॥

ૐ પરશુહસ્તાય નમઃ । ૩૨।

(કુમારલલિતા)

અમોઘચરિતત્વં વ્યનક્તિ પરશુસ્તે ।

શિવાગમવચોભિસ્તતઃ પરશુહસ્તઃ ॥ ૩૨/૩૮॥

ૐ મૃગપાણયે નમઃ । ૩૩।

(રુક્મવતી)

દારુવનસ્થૈસ્ત્વભિચરદ્ભિઃ પ્રેષિત એણો વેદશરીરઃ ।

યાચનમુદ્રા વા તવ હસ્તે તત્પ્રથિતોઽસિ ત્વં મૃગપાણિઃ ॥ ૩૩/૩૯॥

ૐ જટાધરાય નમઃ । ૩૪।

(હરિણી)

દ્વિ(વિ)વિધતનુકો દક્ષધ્વંસે બભૂવિથ યઃ પુરા

મૃગમનુયયાવે(થૈ)કોઽન્યસ્તુ સ્થિતો મખમણ્ડપે ।
અખિલસરિતઃ પારાવારાન્ પવિચતરાન્ ધ(ધ)રાન્
શિરસિ કચતાપન્નાન્ બિભ્રચ્છ્રુતોઽસિ (વિભ્રન્ શ્રુતોસિ) જટાધરઃ ॥ ૩૪/૪૦॥

ૐ કૈલાસવાસિને નમઃ । ૩૫।
(ભુજઙ્ગપ્રયાત)
હરેર્મૂર્ધ્નિ મેરૌ હિમે મન્દરાદ્રૌ
ભવત્કેલિભૂમૌ(મ્યો) ભવત્કર્મગમ્યાઃ(ભવત્કેલિગમ્યાઃ) ।
તદૂર્ધ્વં પરા જ્ઞાનલભ્યાસ્તિ તાસુ
સ્થિતત્વેન જાતોઽસિ કૈલાસવાસી ॥ ૩૫/૪૧॥

ૐ કવચિને નમઃ । ૩૬।
(ભ્રમરવિલસિતા)
વર્માભાવે પર(રે)શરનયનૈઃ
સ્પૃશ્યો દૃશ્યો ભવતિ હિ સકલઃ ।
સ્વાતન્ત્ર્યેણ દ્વયમપિ તિરયન્
દુષ્પ્રાપત્વાત્પ્રભવસિ કવચી ॥ ૩૬/૪૨॥

ૐ કઠોરાય નમઃ । ૩૭।
(વાતોર્મી)
ઘોરૈકા તે તનુરન્યા શિવેતિ
દ્વે તે બિભ્રજ્જગતાં રક્ષકોઽસિ ।
દુષ્ટા જીવા દમનેનૈવ રક્ષ્યાઃ
પૂર્ણત્વાદ્વા કથિતસ્ત્વં કઠોરઃ ॥ ૩૭/૪૩॥

ૐ ત્રિપુરાન્તકાય નમઃ । ૩૮।
(ભારાક્રાન્તા)
સ્થૂલં લિઙ્ગં કરણમિતિ(પિ) યત્ત્રયં વપુષાં નૃણાં
ભક્તાનાં ચેત્તદખિલમપિ ત્વમન્તયસિ (ત્વં મતયસિ) ક્ષણાત્ ।
યદ્વા નાથ ત્રિપુરદહનાદલૌકિકચર્યયા
શ્રીશૈલેઽસિ પ્રર્થિ(થિ)તતનુમાનિતિ ત્રિપુરાન્તકઃ ॥ ૩૮/૪૪॥

ૐ વૃષાઙ્કાય નમઃ । ૩૯।
(સ્વાગત્)
ત્વં ગવામનયતઃ કુપિતોઽપિ

પ્રાર્થિતોઽસિ સુકૃતેન વૃષેણ ।
તેન તદ્ધ્વજરથો (તેન ધ્વજરથો) વૃષશૈલે
વિશ્રુતોઽસ્યભિધયાપિ (વિશ્રુતોઽસ્યભિયાપિ) વૃષાઙ્કઃ ॥ ૩૯/૪૫॥

ૐ વૃષભારૂઢાય નમઃ । ૪૦।
(ગોવૃષ)
નન્દ્યારોહાત્ ત્રૈપુરદાહે હરિણા પૃષ્ટે
વેદાશ્વાનાં ગોવૃષરૂપૈઃ સમુપાત્તત્વાત્ ।
ધર્મજ્ઞાનૈશ્વર્યવિરાગેષુ નિરૂઢત્વા-
દ્વિખ્યાતોઽસિ ત્વં સુરવૃન્દે વૃષભારૂઢઃ ॥ ૪૦/૪૬॥

ૐ ભસ્મોદ્ધૂલિતવિગ્રહાય નમઃ । ૪૧।
(પાદાકુલક)
સ્વાઙ્ગે ભસ્મ વિલિમ્પન્નાથ જ્ઞાનાં (જ્ઞાનાઙ્ગ) શિરોવ્રતમુપદિશસિ ।
ભૂતીશાભિધતીર્થેઽપિ ત્વં ભસ્મોદ્ધૂલિતવિગ્રહનામા ॥ ૪૧/૪૭॥

ૐ સામપ્રિયાય નમઃ । ૪૨।
(સ્રગ્વિણી)
ચન્દનસ્પર્શશીતામૃતસ્યન્દિની
સાન્ત્વવાક્ સામવેદોઽથ સામાનિ વા ।
તૈઃ પ્રયુક્તૈરતીવેશ સંપ્રીયસે (સન્ પ્રીયસે)
ગીયસે તેન લોકેષુ સામપ્રિયઃ ॥ ૪૨/૪૮॥

ૐ સ્વરમયાય નમઃ । ૪૩।
(શાર્દૂલલલિત)
ષડ્જોદાત્તમુખાઃ સ્વરા અવયવા વેદૈકવપુષઃ
સામ્બવ્યઞ્જનકો ભવાન્ સ્વરમયી શક્તિસ્તવ મતા ।
ઓઙ્કારાવયવેષુ(યવવેષુ) મપ્રભૃતયો રુદ્રેશ્વરશિવાઃ
સર્વે યસ્ય વિભૂતિતાં વિદધતે સોઽસિ સ્વરમયઃ ॥ ૪૩/૪૯॥

ૐ ત્રયીમૂર્તયે નમઃ । ૪૪।
(ત્રયી)
સામ્બ ઋગ્વેદકોઽસ્યાગલાન્તાત્
આ ચ નાભેર્યજુર્વેદરૂપઃ ।
નાભિદેશાદધઃ સામવેદઃ

તેન તેઽભૂત્ ત્રયીમૂર્તિનામ ॥ ૪૪/૫૦॥

ૐ અનીશ્વરાય નમઃ । ૪૫।

(વિમોહા)

ઈશ્વરત્વાવધિર્યઃ સ સર્વેશ્વરઃ ।

તસ્ય નેશઃ પરં ત્વં તતોઽનીશ્વરઃ ॥ ૪૫/૫૧॥

ૐ સર્વજ્ઞાય નમઃ । ૪૬।

(સર્વજ્ઞા)

ષટ્ત્રિંશત્તત્ત્વ ત્વય્યેવાધ્યસ્તા ।

સર્વાધિષ્ઠાનં તત્ત્વં સર્વજ્ઞઃ ॥ ૪૬/૫૨॥

ૐ પરમાત્મને નમઃ । ૪૭।

(તનુમધ્યા)

અન્તર્યમયંસ્ત્વં ભૂતાન્યખિલાનિ ।

ભૂયઃ કથિતોઽસિ શ્રુત્વા પરમાત્મા ॥ ૪૭/૫૩॥

ૐ સોમસૂર્યાગ્નિલોચનાય નમઃ । ૪૮।

(લોચન)

માનસાતિગં ત્વાં વિદન્તિ નો લોચનાનિ તે કિઞ્ચ તાન્યતઃ ।

ભાન્તમન્વમી ભાસ્વદાદયો ભાન્તિ સોમસૂર્યાગ્નિલોચનઃ ॥ ૪૮/૫૪॥ ।

var.

ગમાતૃકાયાં તુ ભાસ્વદાદયો લોચનાનિ તે માનસાતિગં ત્વાં વિદન્તિ નો ।

ભાન્તમન્વમી ભાન્તિ સામ્પ્રતં તેન સોમસૂર્યાગ્નિલોચનઃ ॥ ૪૮/૫૪॥

ૐ હવિષે નમઃ । ૪૯।

(દુગ્ધ)

દુગ્ધમાત્રસ્ય કુહરે યથા ઘૃતં

પ્રાણિમાત્રસ્ય દહરે તથા ભવાન્ ।

ચેતસા સંમથિત એવ લભ્યતે

હૂયમાનં ત્વમખિલં તતો હવિઃ ॥ ૪૯/૫૫॥

ૐ યજ્ઞમયાય નમઃ । ૫૦।

(ભુજઙ્ગવિજૃમ્ભિત)

વેદઃ પાદો યૂપો દંષ્ટ્રાનલચયનરસનવદનસ્તનૂરુહધર્મકઃ

સ્રૌવશ્વઞ્ચુઃસર્પિર્નાસા(સો) દિવસરજનિનયનયુગઃ કરઃ સવનત્રયમ્ ।

ઔદ્ગાત્રાન્ત્રો વેદીસ્કન્ધશ્ચરણયુગલમુપનિષદઃ પ્રવર્ગ્યકચભ્રમિઃ
વક્ષોદાક્ષિણ્યો મન્ત્રસ્ફિગ્વિવિધમખકરણતનુકોઽસિ યજ્ઞમયાભિધઃ ॥ ૫૦/૫૬॥

ૐ સોમાય નમઃ । ૫૧।
(મત્તમયૂરા)
મૂર્તિષ્વષ્ટાસ્વીશ તવૈકા રજનીશો
જ્યોતિષ્ટોમસ્તસ્ય હવિશ્ચૈડેવિડશ્ચ ।
સૌરાષ્ટ્રસ્થસ્ત્વં શિવ ગઙ્ગાયમુનસ્થો
ગૌર્યા સાકં નિત્યવિહારીતિ ચ સોમઃ ॥ ૫૧/૫૭॥

ૐ પઞ્ચવક્ત્રાય નમઃ । ૫૨।
(સ્રગ્ધરા)
સર્વેશ બ્રહ્મતત્ત્વેન્દ્રિયવિષયકલાભૂતસાદાખ્યમૂર્તિ-
ષ્વેકૈકશ્યેન પઞ્ચાત્મસુ તવ વદનેષ્વાદિહીનેષુ સત્સુ ।
યોઽયં સુન્દોપસુન્દાસુરહનનનિમિત્તાપ્સરસ્તલ્લજેક્ષા
પ્રાદુર્ભાવઃ સ તદ્ભક્ત્યતિરભસકૃતેઽજાયથાઃ પઞ્ચવક્ત્રઃ ॥ ૫૨/૫૮॥

ૐ સદાશિવાય નમઃ । ૫૩।
(રથોદ્ધતા)
યો વિધીશ્વરદૃશા સદાશિવઃ
તદ્દૃશાપિ ખલુ યઃ સદાશિવઃ ।
તસ્ય કાલકલના ક્વ તે તદ-
સ્યૌપચારિકતયા સદાશિવઃ ॥ ૫૩/૫૯॥

ૐ વિશ્વેશ્વરાય નમઃ । ૫૪।
(વિશ્વ)
કેવલં ચિન્મયજ્યોતિરાત્મૈવ કાશી
તેન સર્વાણિ વિશ્વાન્યતીતાપિ વિશ્વમ્ ।
તત્ર વાસાત્ પરિચ્છેદબુદ્ધ્યા ગૃહીતઃ
કાશિકાધીશ્વરોઽપીશ વિશ્વેશ્વરસ્ત્વમ્ ॥ ૫૪/૬૦॥

ૐ વીરભદ્રાય નમઃ । ૫૫।
(વૈશ્વદેવી)
શ્રીગૌર્યા વીરઃ સ્વીકૃતઃ પુત્રબુદ્ધ્યા
ક્રોધામિસ્વેદોત્પાદિતો ભદ્રનામા ।

ભદ્રાયોગાદ્ધા રાજપૂર્વાસશાલી
તદ્વાંસ્તદ્રૂપસ્ત્વં તતો વીરભદ્રઃ ॥ ૫૫/૬૧॥

ૐ ગણનાથાય નમઃ । ૫૬।
(વૃન્તા વૃત્ત)
શશિકરગુણમુખસંખ્યાનાં પ્રમથતુષિતમયમુખ્યાનામ્ ।
અધિપતિરસિ શિવ કૈલાસે પુરિ નિવસસિ ગણનાથસ્ત્વમ્ ॥ ૫૬/૬૨॥

ૐ પ્રજાપતયે નમઃ । ૫૭।
(શ્યેની)
અન્તરિક્ષભૂમિનાકસંસ્થિતા
યાઃ સહસ્રશઃ સહસ્રસંહિ(મિ)તાઃ ।
રુદ્રનામિકાઃ પ્રજાઃ સૃજસ્યતઃ
સ્થાણુનામકો ભવાન્ પ્રજાપતિઃ ॥ ૫૭/૬૩॥

ૐ હિરણ્યરેતસે નમઃ । ૫૮।
(ઇન્દ્રવજ્રા)
ત્વદ્વીર્યયોગેન ભવેદ્ધિરણ્યં
યદ્વાગ્નિરૂપોઽસ્યથવા જલાર્ધે ।
ત્યક્તેન (યુક્તેન) વીર્યેણ બભૂવ હૈમ- (હેમ-)
મણ્ડં તદીશાસિ હિરણ્યરેતાઃ ॥ ૫૮/૬૪॥

ૐ દુર્ધર્ષાય નમઃ । ૫૯।
(પણવ)
કૈલાસે શિખરિણિ પૌલસ્ત્યપ્રાગલ્ભ્યં તૃણસમતાં પ્રાપ (તૃણસમતામાપ્રાપ) ।
એવં સત્યભિભવકારી કસ્તસ્માત્ત્વં ભવસિ હિ દુર્ધર્ષઃ ॥ ૫૯/૬૫॥

ૐ ગિરીશાય નમઃ । ૬૦।
(ચિત્રપદા)
ભૂરિગુણે પદવાક્યે નિષ્કલુષે સુસમર્થઃ ।
પર્વતરાડપિ શંભો તેન મતોઽસિ ગિરીશઃ ॥ ૬૦/૬૬॥

ૐ ગિરિશાય નમઃ । ૬૧।
(હલમુખી)
મેરુપર્વતમપિ ધનુર્હેતવે કૃશયસિતરામ્ ।
પર્વતે નિવસસિ સુખં નાથ તદ્ભવસિ ગિરિશઃ ॥ ૬૧/૬૭॥

ॐ અનઘાય નમઃ । ૬૨।

(અનઘ)

દુઃખં નાથ ન તે પાપં ચ વ્યસનમ્ ।

ત્રૈલોક્યાધિપતે તસ્માદસ્યનઘઃ ॥ ૬૨/૬૮॥

ॐ ભુજઙ્ગભૂષણાય નમઃ । ૬૩।

(એકરૂપ / અપરાન્તિકા)

અભિચારસમર્થદારુકાવનમૈઃ પ્રહિતાનહીન્દન્ દધત્ ।

ગરુડાદપિ બિભ્યતસ્તનૌ કથિતોઽસિ ભુજઙ્ગભૂષણઃ ॥ ૬૩/૬૯॥

ॐ ભર્ગાય નમઃ । ૬૪।

(મદલેખા)

ભર્જ્યન્તે દુરિતાનાં સંદોહા યદવાસ્યા ।

ગાયત્રીપ્રતિપાદ્યસ્ત્વં તસ્માદસિ ભર્ગઃ ॥ ૬૪/૭૦॥

ॐ ગિરિધન્વને નમઃ । ૬૫।

(તન્વી)

વાગ્વિષયે ત્વં મરુરિવ ભવસિ ત્વાં હિ મનાગભિદધતિ ન વાચો

દિવ્યરથે વા પુરદહનવિધૌ વેદમયાઃ કિલ ચતુરતુરઙ્ગાઃ ।

ચક્રયુગં તે દિનરજનિકરૌ બાણશરીરભૃદભવદુપેન્દ્રો

મેરુરભૂત્તે ધનુરુરગપતિર્જ્યાભવદીશ તદસિ ગિરિધન્વા ॥ ૬૫/૭૧॥

ॐ ગિરિપ્રિયાય નમઃ । ૬૬।

(સમાની)

પ્રેમભૂરિ તે વિભાતિ વૈદિકસ્તવાત્મવાચિ ।

સર્વપર્વતેષ્વપીતિ નામતો ગિરિપ્રિયોઽસિ ॥ ૬૬/૭૨॥

ॐ કૃત્તિવાસસે નમઃ । ૬૭।

(ચન્દ્રલેખા)

વારાણસ્યાં શિવ ત્વદ્ભક્તાંસ્તુદન્તં ગજેન્દ્રં

વિપ્રોત્સૃષ્ટાભિચારવ્યાઘ્રં ચ શૂલેન હત્વા ।

ચર્મદ્વન્દ્વં તદીયં પ્રાવૃત્ય વિભ્રાજમાનો-

(ઽ)સ્યેકામ્રે ચન્દ્રલેખામૌલે તતઃ કૃત્તિવાસાઃ ॥ ૬૭/૭૩॥

ॐ પુરારાતયે નમઃ । ૬૮।

(મન્દાકિની)

ભવાન્ પૂર્વમાભાતિ ચન્દ્રાદિકાત્
ત્રયાણાં પુરાણામારાતિશ્ચ વા ।
મુનીનાં પુરાણાં મઘોવાસ્તિ વા
તતસ્ત્વં પુરારાતિનામાસિ વૈ ॥ ૬૮/૭૪॥।

var.
ભવાન્ પૂર્વમાભાતિ પશ્ચાદિદં જગદ્ભાતિ યદ્વા પુરાણામરિઃ ।
તનોઃ કારણસ્થૂલસૂક્ષ્માત્મનો વિનાશેન વા તે પુરારાતિતા ॥ ૬૮/૭૪॥

ૐ ભગવતે નમઃ । ૬૯।
(જલોદ્ધતગતિ)
પરાક્રમમતી વિરાગયશસી
શ્રિયા સહ જગત્પતિત્વમિતિ ષટ્ ।
ગુણા ભગપદોચિતાસ્ત્વયિ વસ-
ન્ત્યતઃ શ્રુતિગિરેરિતોઽસિ ભગવાન્ ॥ ૬૯/૭૫॥

ૐ પ્રમથાધિપાય નમઃ । ૭૦।
(ઉપસ્થિતા)
મથ્નન્તિતરાં યદવૈદિકાં-
સ્ત્વત્પારિષદાઃ પ્રમથા મતાઃ ।
તાન્ ઈશ સદા પરિપાલયન્
ભક્તૈરુદિતઃ પ્રમથાધિપઃ ॥ ૭૦/૭૬॥

ૐ મૃત્યુઞ્જયાય નમઃ । ૭૧।
(મૃત્યુઞ્જય)
રુદ્રાચ્યુતેશબ્રહ્મણાં કોટ્યો યયા ગીર્ણાઃ ક્ષણાત્ ।
તદ્ગોચરો ન ત્વં વિભો તેનાભવો મૃત્યુઞ્જયઃ ॥ ૭૧/૭૭॥

ૐ સૂક્ષ્મતનવે નમઃ । ૭૨।
(ચુડામણિ)
દુર્જ્ઞેયમૂર્તિધરોઽપ્યાભ્રાતકે પ્રકટઃ ।
સૂક્ષ્માદપીશ તનુ(કૃશ)સ્તેનાસિ સૂક્ષ્મતનુઃ ॥ ૭૨/૭૮॥

ૐ જગદ્વ્યાપિને નમઃ । ૭૩।
(જલધરમાલા)
સત્તા ભાનં પ્રિયમિતિ ચાનુસ્યૂતં

સર્વેષ્વર્થેષ્વનુભવસિદ્ધં લોકે ।
સચ્ચિત્સૌખ્ય(ખ્યં) ત્રયમપિ યૌષ્માકીણં
રૂપં તસ્માદ્ભવસિ જગદ્વ્યાપી (જગદ્વ્યાપીતિ) ॥ ૭૩/૭૯॥

ૐ જગદ્ગુરુવે નમઃ । ૭૪।
(અપરાજિતા)
વટતરુનિકટે મુનીનખિલાન્ સુરાન્
કમલભવમુખાન્ પ્રબોધનમુદ્રયા ।
ઉપદિશસિ પરં મહસ્તવ દક્ષિણા-
મુખપરશિવ તન્મતોઽસિ જગદ્ગુરુઃ ॥ ૭૪/૮૦॥

ૐ વ્યોમકેશાય નમઃ । ૭૫।
(મન્દાક્રાન્તા)
પૃથ્વીપાથોજ્વલનપવનવ્યોમરૂપેષુ ભૂતે-
ષ્વલ્પાલ્પાનિ પ્રથમગદિતાન્યુત્તરાણીશિતૃણિ ।
વ્યોમ્નોઽપીશોઽસ્યથ ચ ગગનં કુન્તલાસ્તે વિરાજો-
ગઙ્ગાધારા વિયદિવ જટાસ્તેન ચ વ્યોમકેશઃ ॥ ૭૫/૮૧॥

ૐ મહાસેનજનકાય નમઃ । ૭૬।
(મહાસેન)
સુબ્રહ્મણ્યેન પૃષ્ટે પ્રણવપરમાર્થોઽત્ર ક ઇતિ
બ્રહ્મણ્યબ્જેક્ષણે સ્વં દિશતિ સતિ કારાનિયમિતે ।
આત્મા વૈ પુત્રનામેત્યુપદિશતિ તૌ મોચિતવતિ
ત્વય્યબ્જાક્ષાજપુત્રૈઃ સ્તુત ઇતિ મહાસેનજનકઃ ॥ ૭૬/૮૨॥

ૐ ચારુવિક્રમાય નમઃ । ૭૭।
(કામદા)
પરશિવ ત્વયા યે નિષૂદિતાઃ
ગજજલન્ધરત્રૈપુરાદયઃ ।
અપુનરાગમં તે પદં ગતા-
સ્તવ ચમત્કૃતશ્ચારુવિક્રમઃ ॥ ૭૭/૮૩॥।

(તવચનમત્કૃતશ્ચારુવિક્રમઃ) ॥ ૭૭/૮૩॥

ૐ રુદ્રાય નમઃ । ૭૮।
(અલોલા)

બાલો ધાતૃલલટાજ્જાતઃ સન્નરુદસ્ત્વં
સોઽરોદીદ્યદરોદીદગ્નિત્વાદપિ રુદ્રઃ ।
ઉલ્લાઘીકરણાદ્વા નિશ્ચિન્તીકરણાદ્વા
સંવર્તે રોદયસિ બ્રહ્માદીન્ ઇતિ (અપિ) રુદ્રઃ ॥ ૭૮/૮૪॥

ૐ ભૂતપતયે નમઃ । ૭૯।
(પ્રમિતાક્ષરા)
ધરણીજલાદિષુ તથાત્મગણે-
ષ્વનુવિશ્ય તાન્નિયમયન્નટસિ ।
અથવા પિશાચનિકરાન્નટયન્
ભુવનાવનાય નનુ ભૂતપતિઃ ॥ ૭૯/૮૫॥

ૐ સ્થાણવે નમઃ । ૮૦।
(અસમ્બાધા)
વૃક્ષાભઃ સ્તબ્ધો દિવિ ભુવિ પુર ઉદ્દિશ્ય
સ્ફારં વર્ષાણિ સ્થિરતર ઉદતિષ્ઠસ્ત્વમ્ ।
જ્યોતિર્લિઙ્ગેઽપિ પ્રભવતિ(સિ) સતિ(શિવ) નૈશ્ચલ્યાત્
કલ્પાન્તે વાતૈર્ન ચલસિ તદસિ સ્થાણુઃ ॥ ૮૦/૮૬॥

ૐ અહિર્બુધ્ન્યાય (અહયે બુધ્ન્યાય) નમઃ । ૮૧।
(કુસુમિતલતાવેલ્લિતા)
બ્રહ્માણ્ડસ્યાધો દશશતફણો બુધ્નભાવં પ્રયાતે
પાતાલે સાધુર્વહતિ વસુધાં સાર્ણવદ્વીપશૈલામ્ ।
તમૂર્ધભ્યોઽન્તે વિષમયવપુઃ કાલસઙ્કર્ષણાખ્યો
રુદ્રો ભૂત્વેદં દહસિ નિખિલં સોઽસ્યહિર્બુધ્ન્યનામા ॥ ૮૧/૮૭॥

ૐ દિગમ્બરાય નમઃ । ૮૨।
(પઞ્ચચામર)
મહેશ દારુકાવને મહર્ષિસિદ્ધસેવિતે
તદઙ્ગનાઃ પતિવ્રતાઃ પરીક્ષમાણયા ધિયા ।
મનોભવાતિશાયિનીં મનોહરાં દધત્તનૂ(નુ)-
મુપાગતસ્તદાશ્રમેષુ ભિક્ષિતું દિગમ્બરઃ ॥ ૮૨/૮૮॥

ૐ અષ્ટમૂર્તયે નમઃ । ૮૩।
(આન્દોલિકા)

મેદિનીં ભૂતમભિમન્યસે શર્વ ઇતિ
પાથસો ભવપદેનાભિમાની ।
રુદ્રનામ્ના તુ વૈશ્વાનરસ્યોગ્ર ઇતિ
મારુતં ભીમ ઇત્યમ્બરસ્ય ।
ભાનુમીશાન ઇતિ શીતભાનું મહા-
દેવ ઇત્યાત્મનો યજ્વનો વા ।
મન્યસે પશુપતીભૂય શમ્ભો જગદ્
વ્યાપ્ય તિષ્ઠન્ ભવસ્યષ્ટમૂર્તિઃ ॥ ૮૩/૮૯ ॥

ૐ અનેકાત્મને નમઃ । ૮૪।
(સાવિત્રી)
યત્કિઞ્ચિદ્બ્રહ્માણ્ડે સર્વં વૈ રુદ્રસ્તત્ ।
સઙ્ખ્યેયત્તાભાવાદ્વિખ્યાતોઽનેકાત્મા ॥ ૮૪/૯૦ ॥

ૐ સાત્ત્વિકાય નમઃ । ૮૫।
(અપરવક્ત્ર)
ત્વયિ નિવસતિ જન્તુરસ્તિતા-
ગુણ ઇતિ તાનિ તવ પ્રયોજનમ્ ।
ત્વમપિ ભવસિ તેષુ તદ્વપુઃ
પરશિવ તેન મતોઽસિ સાત્ત્વિકઃ ॥ ૮૫/૯૧ ॥

ૐ શુદ્ધવિગ્રહાય નમઃ । ૮૬।
(પુષ્પિતાગ્રા)
ઘનઘૃતમિવ સત્ત્વમાત્રપિણ્ડો
ન તુ વપુરણ્વપિ તે રજસ્તમોક્તમ્ ।
શિવ ભવસિ ન ચૈવ કૂટયોધી
હરસિ મલાનિતિ શુદ્ધવિગ્રહસ્ત્વમ્ ॥ ૮૬/૯૨ ॥

ૐ શાશ્વતાય નમઃ । ૮૭।
(જ-વિપુલા)
પૂર્વતો જગતો જનેઃ સર્વસંહારતઃ પરે ।
વર્તમાને જગત્યપિ ત્વમસ્યેવેતિ શાશ્વતઃ ॥ ૮૭/૯૩ ॥

ૐ ખણ્ડપરશવે નમઃ । ૮૮।
(ચપલા)

ગજાસુરવધે ખણ્ડાસ્તવ જાતાઃ પરશવઃ ।
તદારભ્યાખિલૈર્દેવૈર્ગીયસે ખણ્ડપરશુઃ ॥ ૮૮/૯૪॥

ૐ અજાય નમઃ । ૮૯।
(રમણી)
ન જનિઃ શિવ તે તદસિ ત્વમજઃ ॥ ૮૯/૯૫॥

ૐ પાશવિમોચનાય નમઃ । ૯૦।
(ઉજ્જ્વલા)
અભિમતિગુણપઞ્ચપરુર્દશત્રિચતુરયુતવિંશતિપાશતઃ ।
શિવપદભજનેન વિમોચયન્ પશુગણમિતિ પાશવિમોચકઃ ॥ ૯૦/૯૬॥

ૐ મૃડાય નમઃ । ૯૧।
(પરન્તી)
પૂર્ણાહુત્યા ત્વયિ સુહિતે યજ્ઞે પૂર્ણે સતિ સુહિતે ।
યષ્ટૄન્ ધ્યાતૄનપિ સુખયસ્યાર્યાનિતસ્તદસિ મૃડઃ ॥ ૯૧/૯૭॥

ૐ પશુપતયે નમઃ । ૯૨।
(સુવદના)
ખ્યાતં તન્ત્રેષુ પાશઃ પશુરથ પતિરિત્યેતત્ત્રયમપિ
ત્વદ્રૂપં નાથ જીવાન્નિયમયસિ નુતો મુક્તાંશ્ચ કુરુષે ।
ગ્રામ્યારણ્યાધિપત્યં વહસિ ચ યજમાનાત્માભિમતિમાન્
ભક્તાન્ નેપાલપીઠે રમયસિ નિવસન્નાસીઃ પશુપતિઃ ॥ ૯૨/૯૮॥

ૐ દેવાય નમઃ । ૯૩।
(મોદ)
દ્યુતિમોદવ્યવહારાત્સુરજાતિષ્વવતારાત્ ।
શશિમૌલે જગતીનામધિપત્વાદપિ દેવઃ ॥ ૯૩/૯૯॥

ૐ મહાદેવાય નમઃ । ૯૪।
(કલહંસી)
ગીર્વાણાનામપિ મઘુહાદીનાં
નમનીયઃ સ્તવનીયસ્ત્વં દેવઃ ।
શશિબિમ્બેઽધિષ્ઠાત્રી તવ મૂર્તિ-
ર્જગદાપ્યાયયતીતિ મહાદેવઃ ॥ ૯૪/૧૦૦॥

ૐ અવ્યયાય નમઃ । ૯૫।

(રુચિરા)
ન જાયસે પરિણમસિ પ્રવર્ધસે
ન હીયસે ન ચ વિકૃતોઽસિ નશ્યસિ ।
ત્વમવ્યયૈર્દશભિરપિ ક્ષમાદિભિઃ
પરિષ્કૃતઃ પરશિવ તેન ચાવ્યયઃ ॥ ૯૫/૧૦૧॥

ૐ હરયે નમઃ । ૯૬।
(પ્રમુદિતવદના)
પરશિવ તવ નામસઙ્કીર્તનં
કલિકલુષિતચેતસાં પાવનમ્ ।
નિવસસિ નગરે હરિશ્ચન્દ્રકે
હરસિ ચ દુરિતાનિ સ ત્વં હરિઃ ॥ ૯૬/૧૦૨॥

ૐ પૂષદન્તભિદે નમઃ । ૯૭।
(પ્રિયમ્વદા)
અધિમખં રદવિકાસપૂર્વકં
પરિહસન્તમવલોક્ય પૂષણમ્ ।
શિવ ભવાન્ અકૃત પિષ્ટભાગિનં
ગલિતદન્તમિતિ પૂષદન્તભિદ્ ॥ ૯૭/૧૦૩॥

ૐ અવ્યગ્રાય નમઃ । ૯૮।
(હંસશ્યેની)
પૌલસ્ત્યેનોન્નમનસમયે કૈલાસાદ્રે-
ર્બ્રહ્માણ્ડાનામપિ દહનકાલે સંવર્તે ।
યુદ્ધેષ્વન્યેષ્વપિ બહુષુ સન્તોષોદ્રેકા-
દ્દેવીં પશ્યન્નટસિ શિવ તસ્માદવ્યગ્રઃ ॥ ૯૮/૧૦૪॥

ૐ દક્ષાધ્વરહરાય નમઃ । ૯૯।
(કલાતન્ત્ર)
પુરા દેવો દક્ષ ઇતિ શિવ તવૈકઃ શ્વશુરકઃ
પરો મર્ત્યો દક્ષ ઇતિ વિટપિકન્યોદરભવઃ ।
પ્રચેતઃપુત્રોઽખિલમખફલદાતાપિ ચ ભવાં-
સ્તયોર્યજ્ઞૌ હા વ્યદલયદિતિ દક્ષાધ્વરહરઃ ॥ ૯૯/૧૦૫॥

ૐ હરાય નમઃ । ૧૦૦।

(મણિગુણનિકર)
પરશિવ જનયસિ ભવ ઇતિ ભણિતઃ(તદિદં)
સ્થિરમપિ રચયસિ મૃડપદગણિતઃ(ગદિતઃ) ।
સુચરમચરમપિ ચરમગુણધરઃ
પ્રહરસિ જગદિદમખિલમિતિ હરઃ ॥ ૧૦૦/૧૦૬॥

ૐ ભગનેત્રભિદે નમઃ । ૧૦૧।

(ભારાક્રાન્તા)
વિષ્ણુબ્રહ્માદ્યખિલદિવિષદ્ભૂતે મખમણ્ડપે
વીરં ભદ્રાપતિમુપગતં સુરાસુરમર્દનમ્ ।
કોપાટીપાદરુણનયમો ભગસ્તમદીદૃશત્
તન્નેત્રે સ પ્રસભમભિનત્તતો ભગનેત્રભિત્ ॥ ૧૦૧/૧૦૭॥

ૐ અવ્યક્તાય નમઃ । ૧૦૨।

(કુટિલા)
સાઙ્ખ્યો મૂલપ્રકૃતિરિતિ યદાચખ્યૌ
યત્પારાશર્યશ્ચિદિતિ ગદતિ તત્ત્વં તત્ત્વમ્ ।
સામષ્ટ્યં ચાક્ષરમપિ ભુવિ નૈવ વ્યક્તં
લિઙ્ગં બાણાભિધમપિ શિવ ઇત્યવ્યક્તઃ ॥ ૧૦૨/૧૦૮॥

ૐ સહસ્રાક્ષાય નમઃ । ૧૦૩।

(આનન્દ)
અગણિતકરચરણશિરોદંષ્ટ્રોદયુક્ પ્રતિભય-
માશ્ચર્યં યુગપત્સૃષ્ટિસ્થિતિલયકારિ ચ યદવચ્છેદકભેદેન ।
ક્ષેત્રે ચ સુવર્ણાક્ષે પ્રથિતં લિઙ્ગે શિવ તવ યદ્રૂપં
બહુવિધકર્મજ્ઞાનેન્દ્રિયપરિપૂર્ણં તદિતિ સહસ્રાક્ષઃ ॥ ૧૦૩/૧૦૯॥

ૐ સહસ્રપદે નમઃ । ૧૦૪।

(પ્રભદ્રક)
જગદવનાર્થમષ્ટસુ ધૃતાસુ મૂર્તિષુ
સ્મરહર ભાસ્કરસ્ય તવ મૂર્તિરષ્ટમી ।
ગણનપથાતિગાઙ્ઘ્રિમયવિશ્વરૂપધૃક્
શ્રુતિગદિતોઽસિ શઙ્કર તતઃ સહસ્રપાત્ ॥ ૧૦૪/૧૧૦॥

ૐ અપવર્ગપ્રદાય નમઃ । ૧૦૫।

(પૃથ્વી)
પ્રતીકવિદહંગ્રહો ભૃતક ઇત્યુપાસ્તેર્નિજાદ્-
વિધેઃ શિવસલોકતા શિવતદાત્મતા સાર્ષ્ટિતાઃ ।
ભવન્તિ સસમીપતા અમૃતતાત્મવિજ્ઞાનતો-
ઽખિલં ફલમતો ભવેદિતિ મતોઽપવર્ગપ્રદઃ ॥ ૧૦૫/૧૧૧॥

ૐ અનન્તાય નમઃ । ૧૦૬।
(મણિમાલા)
નાત્રેતિ વિભો નેદાનીમિતિ નેદં
બ્રહ્મેતિ ન વાચો યત્ર પ્રસરન્તિ ।
નાસ્ત્યેવ ગુણાનામન્તો ન વિભૂતેઃ
શેષોઽસિ ધરાધૃત્તેન ત્વમનન્તઃ ॥ ૧૦૬/૧૧૨॥

ૐ તારકાય નમઃ । ૧૦૭।
(લાલસા)
તવ પદકમલે ભજન્તો જનાસ્તારિતા યત્ત્વ(ત્વ)યા
ભવજલનિધિતો મહાદેવ તારાખ્યવર્ણાત્મકઃ ।
પ્રણવમુપદિશન્ દ્વિજાન્ કાશિકાયાં પરેતાનપિ
શ્રુતિષુ નિગદિતસ્તદન્વાર્થનામા ભવાં(ભવ)સ્તારકઃ ॥ ૧૦૭/૧૧૩॥

ૐ પરમેશ્વરાય નમઃ । ૧૦૮।
(હરિણપ્લુત, હરનર્તક)
ગ્રામાણાં પતયોઽપિ સોપપદેશ્વરા ભુવિ ભૂરિશ-
સ્તેઽપિ સ્વાશ્રિતમાત્રપોષપરાસ્તથૈવ દિવૌકસઃ ।
ઈશાનામપિ ચેશિતાસિ નિજાશ્રિતાશ્રિતતચ્છ્રિતાન્
સર્વાનપ્યવસીશતા પરમાવધિઃ પરમેશ્વરઃ ॥ ૧૦૮/૧૧૪॥

- -
(૧ વસન્તતિલકા)
જાનાતિ સામ્બ તવ નામરુચિં દધીચિ-
ર્જાનાતિ તે પદનખાગ્રબલં દશાસ્યઃ ।
જાનાતિ દોર્બલપરાક્રમમેષ મેરુ-
ર્જાનન્ત્યમોઘપટુબાણગતિં પુરાણિ ॥ ૧/૧૧૫॥

(૨ શિખરિણી)

ઇયં શમ્ભોરષ્ટોત્તરશતકનામાર્થવિવૃતિ-
ર્વિજાતીયૈરષ્ટોત્તરશતકવૃત્તૈર્વિરચિતા ।
ફલં નામસ્વર્થાવગતિષુ ચ ભૂમ્નૈવ વિદિતં
બહૂનાં વૃત્તાનાં પ્રમિતિરધિકાપ્યત્ર ફલતિ ॥ ૨/૧૧૬॥

(૩ વૈતાલીય)
ઇતિ કાશિનિવાસિસાગ્નિચિત્યક્રતુકૃદ્ભાસ્કરરાયભારતી ।
જનુષઃ સફલત્વસિદ્ધયે શિવનામાષ્ટશતં વ્યવર્વરીત્ ॥ ૩/૧૧૭॥

શ્રીસૌરાષ્ટ્રસોમેશ્વરપાદારવિન્દાર્પણમસ્તુ ।

Notes:

Śivanāmakalpalatālavālaḥ શિવનામકલ્પલતાલવાલઃ of Bhāskarācārya ભાસ્કરાચાર્ય gives the explanation of each of the 108 ૧૦૮ Names of Śiva શિવ i.e. Śivāṣṭottaraśatanāma શિવાષ્ટોત્તરશતનામ.

Kalpalatā કલ્પલતા implies a fabulous creeper granting all desires.
Ālavāla આલવાલ refers to a basin for water round the root of a tree.

A corresponding Stotram સ્તોત્રમ્ of these Names, i.e. ŚivāṣṭottaraśatanāmaStotram શિવાષ્ટોત્તરશતનામસ્તોત્રમ્ is found in the ŚivaRahasyam Amśaḥ 7 Adhyāya 13/203-215 શિવરહસ્યમ્ અંશઃ ૭ અધ્યાય ૧૩/૨૦૩-૨૧૫ and can be referred to from one of the Links given below.

The Śivāṣṭottaraśatanāmāvaliḥ શિવષ્ટોત્તરશતનામાવલિઃ has been collated from the ŚivāṣṭottaraśatanāmaStotram શિવાષ્ટોત્તરશતનામસ્તોત્રમ્ from the ŚivaRahasyam Amśaḥ 7 શિવરહસ્યમ્ અંશઃ ૭, Commentary on the same by Nīlakaṇṭha Dīkṣita નીલકણ્ઠ દીક્ષિત, and the Śivanāmakalpalatālavālaḥ શિવનામકલ્પલતાલવાલઃ of Bhāskarācārya ભાસ્કરાચાર્ય; and, can be referred to from one of the links given below.

The commentary by Nīḷakaṇṭha Dīkśita નીલકણ્ઠ દીક્ષિત mentions that this Stotram is “said to be from” the Skanda Purāṇa - Śaṅkara Saṃhitā - Śivarahasya Khaṇḍa સ્કન્દપુરાણ - શઙ્કરસંહિતા - શિવરહસ્ય ખણ્ડ; however, the evidence of the same in print is pending verification.

The variations in the Names found are explained in the commentaries of the respective texts.

The verse numbers correspond to those used in the linked references. The ‘1/7’ for example indicates 1st name in the nAmAvalI and 7th verse in the print especially with the commentary.

The prosody Chanda-Vritta છન્દ - વૃત્ત for each verse is given above the verse in parenthesis. Refer to the links given in the end for the rules.

*Shivanama Kalpalatalavalah*

pdf was typeset on September 13, 2024

Please send corrections to *sanskrit@cheerful.com*